# श्री लक्ष्मी-कवच (Shri Laxmi Kavach)

ॐ शिरो मे रक्षताद् देवी, पद्मा पंकज-धारिणी ।
भालं पातु जगन्माता, लक्ष्मीः पद्मालया च मे ।।
मुखं पायान्महा-माया, दृशौ मे भृगु-कन्यका ।
घ्राणं सिन्धु-सुता पायान् नेत्रे मे विष्णु-वल्लभा ।।
कण्ठं रक्षतु कौमारी, स्कन्धौ पातु हरि-प्रिया ।
हृदयं मे सदा रक्षेत् सर्व-शक्ति-विधायिनी ।।
नाभिं सर्वेश्वरी पायात् सर्व-भूतालया च मे ।
कटिं च कमला पातु, उरू ब्रह्मादि देवता ।।
जंघे जगन्मयी रक्षेत्, पादौ सर्व-सुखावहा।
श्री वीज-वास-निरता, सर्वांगे सनकात्मजा ।।
सर्वतोभद्र-रूपा मामव्याद् दिक्षु विदिक्षु च ।
विषमे संगटे दुर्गे, पातु मां व्योम-वासिनी ।।

DR. RUPNATHJI( DR. RUPA NATH)